हरिप्रभा
वर्ष-१२, अङ्क ८-९
अगस्त-सितम्बर २०१७ पृ० २५-३१
प्रधान सम्पा० श्री राजेशकुमार खुल्लर
हरियाणा संस्कृत अकादमी पञ्चकूला

ISSN 2278-0416

3.3.3.

XV

# परिभाषासूत्रदृशा पाणिनिभोजदेवयोः सूत्रपाठः

कु. विदुषा

वैयाकरणाः हि प्रथमे विद्वांसः व्याकरणमूलत्वात्सर्वविद्यानाम् इत्यभियुक्तोक्त्या व्याकरणं सर्वाः विद्याः अतिशेते। ऐन्द्रव्याकरणादारभ्य काले-काले महान्तैः वैयाकरणैः स्वीयं वैयाकरणवैदुष्यं विविधानां ग्रन्थानां स्वरूपेऽस्माकं पुरतः उपस्थापितम्। अस्यां धारायाम् आचार्यस्य पाणिनेः समादरणीयं स्थानमस्ति। कालान्तरे धाराधीश्वरो महाराजो भोजदेवो मुख्यतः पाणिनिव्याकरणमाधृत्य कातन्त्र-चान्द्र-प्रभृतीन् वैयाकरणान् यथेष्टमुपयुज्य नवीनं सरस्वतीकण्ठाभरणम् नाम व्याकरणं प्रणिनाय। ग्रन्थस्यास्येदमस्ति वैशिष्ट्यं यत् गणपाठः, परिभाषापाठः, उणादिपाठः, फिट्सूत्राणि, चेत्येते विषयाः सूत्रपाठ एव एकत्रोपात्ताः विद्यन्ते। पत्रेऽस्मिन् पाणिनिभोजदेवयोः परिभाषासूत्राणां तुलनात्मिका स्थितिः विवेच्यते।

**परिभाषासूत्राणां स्वरूपं महत्त्वञ्च:**

सूत्राणां द्वितीयः प्रकारः परिभाषासूत्रमस्ति। परि उपसर्गपूर्वकात् भाष् धातोः अच् टाप् च प्रत्ययौ भूत्वा निष्पन्नोऽयं शब्दो वर्तते। स्वामिना दयानन्देन परिभाषायाः लक्षणमेवं कृतम्-

एकदेशस्थिता शास्त्रभवने याति दीपताम्।
परितो व्यापृतां भाषां परिभाषां प्रचक्षते॥[१]

माघानुसारेण-

परितः प्रमिताक्षरापि सर्वं विषयं प्राप्तवती गता प्रतिष्ठाम्
न खलु प्रतिहन्यते कदाचित् परिभाषेव गरीयसी यदाज्ञा॥[२]

काशिकायाम् इको गुणवृद्धी इति सूत्रव्याख्याप्रसङ्गे लिखितं वर्तते- परिभाषेयं स्थानिनियमार्था। अनियमप्रसङ्गे नियमो विधीयते।[३]

परिभाषासूत्राणि विधिसूत्राणां प्रयोगनियामकानि भवन्ति। वस्तुतः परिभाषा विधिशास्त्रस्य प्रवृत्तिं साधुत्वस्य दिशायामुन्मुखीकरोति। आचार्यो हरदत्तः परिभाषायाः परिभाषान्वं प्रस्तौति- परितः सर्वत्र पूर्वत्र परत्र व्यवहिते नान्तरे च भाष्यते कार्यमनया सा परिभाषा।[४]

संज्ञाविध्यादिसूत्राणां प्रवृत्तौ अव्याप्त्यतिव्याप्त्यसंभवादीनां दोषाणां परिहारः परिभाषायाः लक्ष्यं वर्तते। परिभाषायाः मुख्यतस्त्रिप्रकाराः भवन्ति:-

१. ज्ञापकसिद्धाः - सूत्रवचनेन साक्षादकथयित्वा प्रकारान्तरेण इङ्गितेन चेष्टितेन ज्ञापिताः परिभाषा